श्री

[अथर्ववेदीयोपनिषच्छान्तिपाठ —

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ओंशान्तिश्शान्तिश्शान्तिः]

श्री श्रीनिवासपरब्रह्मणे नमः

[येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम् ॥]

श्रीरङ्गरामानुजमुनिविरचिता अथर्वशिखाप्रकाशिका ।

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
कुर्वेऽथर्वशिखाव्याख्यां विदुषां तोषहेतवे ॥

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः

अथर्वशिखोपनिषद्भाष्यपरिष्कारः

ईशानः शम्भुः शिवशब्दसमीरितोऽपि
मुक्त्यर्थभक्तिविषयः पुरुषः स विष्णुः ।
इत्यादिशत् स्फुटमथर्वशिखेति तत्त्व
बुद्ध यतो भवतु तेभ्य इदं नमो नः ॥

अथर्वशिखोपनिषत्

प्रथमः खण्डः हरिः ओम् ।

१. अथ हैनं? पैप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वाणमुवाच—

२. (१) किमादौ प्रयुक्तं ध्यानं ध्यायितव्यम्, (२) किं [तद्]

ध्येयं निर्धारयितुमाख्यायिकामाह—अथ हैनम्.........। पिप्पलादसुतश्चाङ्गिराश्च ब्रह्मपुत्रश्च (?) सनत्कुमारश्चाथर्वाणं गुरुमुपेत्य ऊचु । उवाचेति प्रत्येकाभिप्रायेणैकवचनम् ।

२. ध्यायते अनेनेति ध्यानं ध्यानकरणम् । उपासनस्याऽऽदौ

ध्येयं निर्धारयितुमिति । ध्यानकरण—ध्यान—ध्यातृ—ध्येय रूपांशचतुष्टयविषयप्रश्नोत्तररूपाया अप्यस्या उपनिषदो ध्येयदेवताविशेषनिर्धारणैदम्पर्यम्, 'न कारण कारणानाम्' इत्यादिना परनिषेधपूर्वं तदंशस्थापनोपपादनादवगम्यते । अत एवमुक्तिः ॥ (१)

सनत्कुमारोऽपि कश्चित् पिप्पलादसुत इति भ्रान्तिव्युदासायाह ब्रह्मपुत्र इति । ऊचुरिति वचनम् उपरि, 'तेभ्योऽथर्वा प्रत्युवाच' इति वाक्ये प्रतिपाद्यपुरुषस्वरूपबहुवचनान्तेदम्पदश्रवणात् प्रष्टारो बहव इति निश्चित्य । एवञ्च पैप्पलादोऽन्यः, अङ्गिरा अन्य इति मन्तव्यम् । पिप्पलादोऽङ्गिरा इत्यपि श्रुतिं पठन्ति केचित् । तदा स्पष्टं बहुत्वम् । पिप्पलादः पैप्पलादोऽङ्गिरास्सनत्कुमारश्चेति पाठः श्रुतिभाष्ययोः स्याच्चेदपि विमृश्यम् ॥ ध्यानकरणमन्त्रः क इत्येतावन्मात्रप्रश्ने ध्यायितव्यमिति पदं व्यर्थम् । ध्यानध्यातारौ किंदेवतारूपेण ध्यातव्यावित्येवोपरि प्रश्नः क्रियते ; न तु किं नाम ध्यानस्वरूपम्, को नाम ध्यातेति । उपरि तैलधारावदविच्छिन्नस्मृतिसंततिर्ध्यानम्, धर्मज्ञानयोगसंस्कृतान्तःकरणो ध्यातेत्येवंरूपोत्तराभावात् । ध्यानं विष्णुः, ध्याता रुद्र इति देवतारूपत्वस्यैव कथनाच्च । अतो ध्यानकरणमन्त्रोऽपि किंरूपो ध्यातव्य इत्येव प्रथमप्रश्नोऽपि स्यात् । एवञ्च—ध्यानकरणमन्त्रः प्रणवः । स च नानाक्षरसमुदायात्मकः । तत्र समुदायः ब्रह्मत्वेन भाव्यः । अक्षरमात्राश्च लोक-

ध्यानम्, (३) को वा ध्याता, (४) कश्च ध्येय इति ।

३ स एभ्योऽथर्वा प्रत्युवाच-(१)ओमित्येतदक्षरमादौ प्रयुक्त ध्यान ध्यायितव्यमिति, एतदक्षर पर ब्रह्म । ४ अस्य पादाश्चत्वारो वेदा । ५ चतुष्पादिदमक्षर पर ब्रह्म ।

६ पूर्वाऽस्य मात्रा पृथिव्यकार स ऋग्भि ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्य । ७ द्वितीयाऽन्तरिक्ष स उकार स यजु-

---

प्रयुक्तो ध्यानकरणभूतो ध्यातव्यो मन्त्र क इत्यर्थ । क मन्त्र ध्यात्वा आदावुच्चार्य ध्यान कर्तव्यमित्यर्थ । तथा ध्यानक्रिया किंदेवतारूपा ध्यातव्या । ध्याता किंदेवतारूपो ध्यातव्य । ध्येयो देवताविशेष क इत्यर्थ ।

३ एतदक्षर पर ब्रह्म । अस्मिन्नक्षरे परब्रह्मबुद्धि कर्तव्येत्यर्थ ।

४ अस्य ओंकारस्य अकार-उकार-मकार-अर्धमात्रारूपेषु चतुर्ष्ववयवेषु चतुर्वेदबुद्धि कर्तव्येत्यर्थ । ५ एतस्मिन् ओमित्यक्षरेऽभ्यस्त पर ब्रह्म प्रतीकस्य चतुष्पात्त्वेन स्वयमपि चतुष्पादित्यर्थ ।

६-७ अकार-उकार-मकार-नादरूपार्धमात्रात्मकान् ओंकारावयवान् पृथिव्यन्तरिक्षद्युलोकसोमलोकत्वै, ऋग्यजुस्सामाथर्वणत्वै, ब्रह्मविष्णुरुद्रसवर्तकाग्नित्वै, वसुरुद्रादित्यमरुत्त्वै, गायत्रीत्रिष्टुब्जगती

वेदतत्तद्देवतादिरूपेणेति उपरितनवर्णनोपपत्ति । अत कि ध्यायितव्यमित्यस्य केन रूपेण ध्यातव्यमित्यर्थो वर्णनीय । तस्मात् भाष्ये क ध्यात्वेति किंरूप ध्यात्वेत्यर्थकम् । तुरीयप्रश्ने तु ध्येय स्वरूपण ध्येय इत्युक्तावपि ध्येयगोचरदृष्टिविधेर्मोक्षार्थविधायामयोगात् ध्येयतत्त्वमेव पृष्ट भवतीति 'ध्येयो देवताविशेष क' इत्येव प्रश्नपर्यवसानम्। तद्ध्यानमिति। तत् ध्यानमिति पूर्वप्रयुक्तकरणार्थक ल्युडन्तघटकधातूक्त ध्यानमित्यर्थ ।

र्भिर्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुप् दक्षिणाग्निः । तृतीया द्यौः स मकारः सामभिः सामवेदो रुद्र आदित्या जगत्याहवनीयः । याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोकः ओंकारः साऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिः ।

८. भास्वती स्मृता प्रथमा रक्तपीता महद्ब्रह्मदे(दै)वत्या ।

९. द्वितीया विद्युमती कृष्णा विष्णुदेवत्या ।

विराट्त्वैः, गार्हपत्यदक्षिणाग्न्याहवनीयैकर्षित्वैः स्तौति–पूर्वाऽस्य. ....। ऋग्भिः ऋग्वेदः । ऋङ्मन्त्रोपेतः ऋग्वेद इत्यर्थः । एवमुत्तरत्रापि । सूर्यलोकलक्षणद्युलोकापेक्षया चन्द्रलोकस्योर्ध्ववर्तित्वम् (त्वात् !) सोमलोकस्य द्युलोकापेक्षया पृथङ्निर्देशोपपत्तिः । आथर्वणिकानामेकाग्नित्वात् गार्हपत्यदक्षिणाग्न्याहवनीयाभावात् तस्यैवैकाग्नेरेकर्षिशब्दितस्य गार्हपत्यादिस्थानविवेश उपपद्यते ॥ नन्ववसाने श्रूयमाणनादात्मिकाया अर्धमात्रायाः, "अर्धमात्रात्मको नादो ब्रह्मनादैकविग्रहः" इति प्रमाण प्रतिपन्नाया ओंकारभिन्नत्वात् कथमस्या अर्धमात्राया ओंकार इत्युक्तिरिति चेत्– 'अर्धमात्रात्मको नादो ब्रह्मनादैकविग्रहः' इत्योंकार प्रस्तुत्य, 'ततोऽभूत् त्रिवृदोंकारः' इति ओंकारप्रकृतित्वस्य श्रवणात् तस्य ओंकाराभेदव्यपदेश इति द्रष्टव्यम् ॥

८. प्रथमा अकाराख्या अर्ध (!) मात्रा भास्वतीनाम्नी रक्तपीतवर्णा महत्त्वगुणकब्रह्मदेवत्या ।

९. विद्युमतीति स्मृता कृष्णवर्णेत्यर्थः ।

भास्वतीः स्मृताः इति पृथग्वाक्यपाठस्सर्वत्र । (८-१३) तात्पर्यचन्द्रिकायामपि इममंशं परित्यज्य प्रथमेत्यादिवाक्यमुपात्तम् । एवं

१०. तृतीया शुभाशुभा शुक्ला रुद्रदेवत्या। ११. याऽवसानेऽस्य चतुर्थ्यर्धमात्रा विद्युमती सर्ववर्णा पुरुषदेवत्या।

१२. स एष ह्योंकारश्चतुरक्षरश्चतुष्पादश्चतुश्शिरश्चतुरर्धमात्रः (श्चतुर्थमात्रः)। १३. स्थूलमेत सत् (स्थूलमेतत्) ह्रस्वदीर्घप्लुत-

---

१०. शुभाशुभेति प्रसिद्धा शुक्लवर्णेत्यर्थ। ११. अत्र पुरुष शब्देन वासुदेव उच्यते।

"भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधी च वर्तेते वासुदेवे सनातने॥"

"पुरुषज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते॥"

"स्त्रीप्रायमितरत् सर्वं जगत् स्थावरजङ्गमम्।
ऋते तमेकं पुरुषं वासुदेवं सनातनम्॥"

"ब्रह्माद्याः सकला देवा यक्षगन्धर्वकिंनराः।
ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति॥"

इति स्मरणादिति द्रष्टव्यम्।

१२. चतुर्थी अर्धमात्रा यस्य स तथोक्त। पूरणप्रत्ययाभावात् (व) छान्दस। १३-१४. स्थूलमेत मत ह्रस्वदीर्घप्लुतमिति।

नृसिंहतापनीयेऽपि। तद्धि माण्डूक्याथर्वशिखाथर्वशिरोवाक्यानि बहुलमनूद्य वर्णयति। (८)

त्रिवृदोंकारं प्रति नादस्य प्रकृतित्ववत् पुरुषस्य वासुदेवस्य त्रिमूर्तिप्रकृतित्वमिति देवतात्वोपपत्तिः। (११)

स्थूलमेत सदिति पाठमादाय आङ्पूर्वकइण्धातोः क्तप्रत्यये एतमिति मिलितमित्यर्थकमुक्तमिति ज्ञायते। स्थूलमेतदित्येव

मिति। १४. ओं१ ओं२ ओं ३ [सः।]

१५. इति त्रिरुक्त्वा चतुर्थदशान्त आत्मा प्लुत[प्रणव]प्रयोगेण समस्तमोमिति प्रयुक्त(ज्य) आत्म (प्रयुक्तमात्म) ज्योतिः सकृदावर्तते।

स्थूलं मिलितं सत् ह्रस्वदीर्घप्लुतभेदेन त्रिविधमित्यर्थः। तदेव प्रदर्शयति ओं १. ओं २. ओं ३.। न च एचो ह्रस्वाभावात् कथमोंकारस्य ह्रस्वत्वमिति शङ्क्यम् — न्यूङ्खेषु ह्रस्वस्यापि प्रयोगदर्शनात्।

एवमुक्तप्रकारेण अकार–उकार–मकारात्मकावयवत्रयप्राधान्येन ब्रह्मविष्णुरुद्ररूपदेवतानुसंधानपूर्वकं ह्रस्वदीर्घप्लुतरूपेण त्रिरुक्त्वा, चतुर्थः तुरीयमात्रार्धभूतः पुरुषशब्दितो वासुदेवः शान्ताख्यो महात्मा चतुर्मात्रप्लुतप्रयोगेण अनुसंदधान(धीयमान ?)स्सन् सकृत् एकरूपतया

पाठश्चेत्, स्थूलपदमेव मिलितार्थकं नेयम्; अक्षराविभागात्। प्रश्नोपनिषदि तु ह्रस्वदीर्घप्लुतानां मात्रापदेन ग्रहणम्। न्यूङ्खेष्विति। न्यूङ्खः ओकारषोडशकादि व्याकरणे वाचस्पत्यादौ च द्रष्टव्यम्। (१३)

१५. इति त्रिरित्यत्र इतीत्यस्य एवमित्यर्थः। तद्विवरणम् उक्तरूपेणेति। समस्तमिति क्रियाविशेषणम्। कृत्स्नतयेत्यर्थः। समस्तम् ओमिति प्लुतप्रयोगेण प्रयुक्त इत्यन्वयः। प्रकर्षेण युक्तः योगविषयीकृतः अनुसंहितः। प्रयुक्त इति आत्मविशेषणम्। आत्मपदात्मज्योतिःपदस्वारस्यादेवं व्याख्यातम्। अन्यथा पुनः—चतुर्थः नादरूपः, शान्त आत्मा विना प्रणवं प्रयोगानर्हस्वरूपः प्लुतप्रणवविशिष्टतयैव समस्ततया ओमिति प्रयुज्यमानः स्वात्मस्वरूपं प्रकाशयन् सकृदुक्तो भवति। एषा ह्रस्वदीर्घप्लुतानां पृथक् पृथक् प्रयोगानन्तरं प्लुतस्य (सनादस्य) पुनरेकवारमावृत्तिः समस्तप्रणवप्रयोगः इति वाक्यार्थो वक्तव्यः। मात्रार्धेति वासुदेवे शान्तात्मनि चतुर्थ इति

१६. प्राणान् सकृदुच्चारितमात्रस्स एष ऊर्ध्वमुन्नमयतीत्योंकारः। प्राणान् सर्वान् प्रलीयत इति प्रलयः।

१७. प्राणान् सर्वान् परमात्मनि प्रणामयतीत्येतस्मात् प्रणवः। चतुर्धाऽवस्थित इति

१८. सर्ववेददेवयोनिः, सर्वमान्यश्च(व्यवस्तु)(व्यवस्तु)प्रणवात्मकम्।

इत्यथर्वशिखायां प्रथमः खण्डः।

स्वात्मज्योतिः स्वप्रकाशज्ञानमय आवर्तते आ=समन्तात् हृदये वर्तत इत्यर्थः। चतुर्थार्धमात्रयाऽनुसंहितः परमात्मा हृदये प्रतिष्ठितो भवतीत्यर्थः।

ओंकारादिनामानि निर्वक्ति— १६ ऊर्ध्वलोकमुन्नमयति प्रापयति। तस्मादोंकार इत्यर्थः।

१७-१८ सर्वेन्द्रियाणि परमात्मप्रवणानि करोतीति प्रणव इत्यर्थः। चतुर्धाऽवस्थितः। प्रणव उक्तरीत्या अकार-उकार-मकार नादात्मना चतुर्धा अवस्थित इत्यर्थः। तस्यैवोंकारस्यावयवभूतानां पादानां ऋग्यजुस्सामाथर्ववेदरूपत्वात्, (!), ब्रह्मविष्णुरुद्रसंवर्तकाग्नि-रूपत्वात्, वसुरुद्रादित्यमरुद्रूपत्वाच्च, गायत्र्यादिच्छन्दोरूपत्वाच्च सर्व-वेददेवयोनित्वमोंकारस्य। अत एव सर्वमपि वाक्यं प्रणवात्मकमि(?)त्यर्थः।

चतुर्थार्धमात्राऽभेदारोपः। उक्तत्रिमूर्त्यधिकत्वाद्वा चतुर्थता। 'चतुर्थं मन्यन्ते स आत्मा' इति माण्डूक्येऽप्युक्तम्। अत्र अकारादौ क्रमेण ब्रह्मविष्णुरुद्रत्वोक्तिः, माण्डूक्ये क्रमेण अनिरुद्धप्रद्युम्नसंकर्ष-णत्वोक्तिश्च अविरुद्धा, चतुर्मुखस्य जागरस्याद्युपनिरुद्धाधीनत्वात्, रुद्रस्य च संहारे संकर्षणाधीनत्वात् अत्रापि माण्डूक्योक्त एव तात्पर्यात्।

१७-१८. गायत्र्यादीति पञ्चम्यन्तं वेदरूपत्वादित्येतत्समनन्तरमेव

१. देवांश्च समुद्धर्ता सर्वेभ्यो दुःखभयेभ्यस्संतारयतीति तारणात् तारः। २. सर्वे देवा अस्मिन् विशन्तीति विष्णुः। ३. सर्वाणि बृंह(ब्रह्म)यतीति ब्रह्म। सर्वस्यान्तःस्थाने ध्यायिभ्यः प्रदीपवत् प्रकाशयतीति प्रकाशः [प्रकाशः] प्रकाशेभ्यः। ४. सदा ओमित्यन्तश्शरीरे विद्योतयति (विद्युद्वद् द्योतयति) मुहुर्मुहुरिति

ख. २.

१. देवान् सत्त्वप्रकृतिकान् समुद्धर्ता। तदेव विवृणोति— सर्वेभ्यः —तारः। अतः प्रणवस्य तारशब्दितत्वमित्यर्थः। २. सर्वे देवाःब्रह्माद्या अन्वयत्वेनोंकारे प्रविष्टा इति ओंकार एव विष्णुरित्यर्थः।

३. सर्वाणि स्वानुसंधातृभूतानि ज्ञानानन्दादिगुणैः बृंह (ब्रह्म) यति वर्धयतीति ब्रह्म। सर्वस्यान्तःस्थाने ध्यायिभ्यः प्रदीपवत् प्रकाशयतीति प्रकाशः— (?) प्रकाशेभ्यः। सर्वस्य ध्यातृजनस्यान्तःस्थाने हृदये वर्तमानस्सन् ध्यायिभ्यः स्वेन ब्रह्मध्यायिभ्यः प्रदीपवत् ध्येयं प्रकाशयतीति प्रकाशः प्रकाशेभ्यः प्रकाशेभ्योऽपि सूर्यादिभ्य अतिशयिततया प्रकाशयतीति प्रकाश इत्यर्थः। ४. सदा ओमिति अन्तःशरीरे हृदयस्थाने मुहुर्मुहुस्तत्त्वं विद्योतयतीति विद्युदिति

स्यात्?। सर्ववान्यवस्तु प्रणवात्मकमिति शङ्करानन्दपाठः। वाक्यं= नाम। वस्तु=रूपम्। सर्वमपि नामरूपं ब्रह्मात्मकमिति तदुक्तोऽर्थः। सर्ववाच्यवस्तु प्रणवात्मकमिति अष्टोत्तरशतोपनिषत्कोशे। सर्ववाक्यञ्च प्रणवात्मकमिति पाठेऽपि सर्वस्यापि वैदिकवाक्यस्य मन्त्रादेश्च प्रणवपूर्वमेव प्रयोगात् प्रणवात्मकत्वं विवक्षितं स्यात्?।

ख. २.

प्रकाशः प्रकाशः प्रकाशेभ्य इति द्विरावृत्तपाठो भाष्येऽपि संमतो वेति विमृश्यम्।

विद्युदिति प्रतीयात् । ५. दिशं दिशं भित्त्वा सर्वान् लोकान् व्याप्नोति व्यापयतीति व्यापनात् व्यापी महादेवः ।

६. पूर्वाऽस्य मात्रा जागर्ति जागरितम् । ७. द्वितीया स्वप्नम् । तृतीया सुषुप्तिः । चतुर्थी(र्थः)तुरीयम् ।

८. मात्रा मात्राः प्रतिमात्रा गताः । ९. सम्यक् समस्तानपि वादान् जयतीति स्वयं प्रकाशः स्वयं ब्रह्म भवतीत्येष सिद्धिकरः ।

प्रतीयात् विद्युदात्मकतया जानीयादित्यर्थः । दिशं भित्त्वा=दिक्कृतपरिच्छेदमन्तरेण सर्वदिग्देशवर्तिव्यापकतया व्यापित्वम् । व्यापित्वादेव महादेवत्वम् ; व्यापित्वस्यैव महत्त्वा (त्स्वरूपत्वा ?) दिति भावः ॥

एवमनुसरणार्थं नामानि निरुच्य, अथ 'एतदक्षरं परं ब्रह्म' इति प्रक्रमोपदिष्टं ब्रह्मध्यानसाधनत्वं निरूप्यते—**पूर्वाऽस्य मात्रा जागर्ति ।** "जागरिते ब्रह्म" इति श्रुतेः जाग्रद्दशासंपादकत्वादकारस्य ब्रह्मणो जागर्तीत्युक्तिः । अतः पूर्वमात्रैव **जागरितम्** । **तुरीयम्** मोक्ष इत्यर्थः । ब्रह्मविष्णुरुद्रपुरुषशब्दितानां चतुर्णाम् अकार--उकार--मकार-अर्धमात्रार्थाना जागरितस्वप्नसुषुप्तिमुक्त्यवस्थासंपादकत्वात् तदभिमानित्वाच्च । ' जागरिते ब्रह्मा ; स्वप्ने विष्णुः ; सुषुप्ते रुद्रः ; तुरीयं परमक्षरम्" इति श्रुत्यन्तरात् ।

[मात्रा ?] एवं प्रमात्रा = एवमवगच्छतेत्यर्थः । **मात्राः** चतस्रोऽपि मात्राः **[प्रतिमात्राः गताः ?]** प्रतिनियतार्थतया अवगता भवन्तीत्यर्थः । ९. समस्तान् ब्रह्मवादान् जयतीत्यर्थः । **स्वयं ब्रह्म भवति**—आविर्भूतब्राह्मरूपो भवतीत्यर्थः । **एषः** ओंकारः सर्वसिद्धि-

१०. एतस्माद् ध्यानादौ प्रयुज्यते। ११. सर्वकरणोपसंहारत्वात् धार्यधारणाद् ब्रह्म तुरीयम् ॥

१२. (२) सर्वकरणानि मनसि संप्रतिष्ठाप्य ध्यानं विष्णुः।

कर इत्यर्थः । **एतस्मात् ध्यानादौ प्रयुज्यते** । एतस्माद्धेतोः *ध्यानादौ प्रणवः प्रयुज्यत इत्यर्थः ।* **सर्वकरणोपसंहारत्वात्** सर्वेन्द्रिय वशीकरणहेतुत्वादित्यर्थः । **धार्यस्य** अवधारणीयस्य ब्रह्मणोऽवधारण हेतुत्वाच्च, ब्रह्मप्राप्तिसाधनत्वाद् ब्रह्मप्रतीकत्वाद् ब्रह्मगुणयोगाच्चैतदेव ब्रह्मेत्यर्थ. ॥ (११)

१२. एवं प्रथमप्रश्नस्योत्तरमुक्त्वा द्वितीयप्रश्नस्योत्तरमाह-**सर्व करणानि....विष्णुः** । सर्वाणि बाह्येन्द्रियाणि मनसि विलीनानि कृत्वा क्रियमाणं ध्यानम् । तद् विष्णुः । विष्णुरूपपरत्वध्यानं कर्तव्यमित्यर्थः ।

ब्रह्मगुणेति । परस्य ब्रह्मणो बृहत्त्वमप्यस्ति । प्रणवे तदभावेऽपि पूर्वोक्तं बृंहणत्वमस्तीति भावः ।

ध्यानं विष्णुरिति । अत्र ज्ञानस्य स्वयंप्रकाशतया मितिमातृमेय-रूपत्रिपुटीभाननैयत्येऽपि निर्विकल्पसमाधौ, "दयाशिशिरिताशया मनसि मे सदा जागृयुः श्रियाऽध्युषितवक्षसः...संविदः" इति श्रीदेशिकोक्तदिशा मितिमेयभेदापरिस्फूर्त्या मेयमात्रशेषणात् ध्यानं केवलं ध्येयविष्णुमयमेव भवति । तदेवंध्यानं श्रेष्ठमिति दर्शितम् । अनेनैव ध्येयो विष्णुरिति सिद्धम् । ध्याता रुद्रः । विष्णूपासकेषु योगिषु मध्ये सर्वज्ञो रुद्र एव सम्यक् परमात्मनो ध्यातेति स्वस्मिन् रुद्रभावना ध्यातुर्ध्यानपरिनिष्पत्त्युपयोगिनीति भावः । अनेन पर-मैकान्तिनोऽपि रुद्रे गौरवातिशयः, न तावता मुक्त्यर्थमुपास्यत्वमिति च दर्शितम् ॥ अत्र प्रथमवाक्ये सर्वकरणानां मनसि प्रतिष्ठापनम्,

द्वितीयवाक्ये प्राणस्यापि मनसि प्रतिष्ठापनम्, तृतीयवाक्ये मनसीव परमात्मनि प्रतिष्ठापनञ्च क्रमेणोक्तमस्ति। तथाच प्रत्याहार, प्राणायाम, ध्यानधारणादि च क्रमेणोक्तमिति प्रतीयते। तत्रैतद्वाक्य-त्रयमुख्यार्थभूतेषु, 'ध्यान विष्णु,' 'ध्याता रुद्र,' 'ध्यायीतेशान प्रध्यायितव्यम्' इत्येतेषु प्रत्याहाराद्यर्थत्रयक्रमस्य न कश्चित् प्रतिनियत उपयोगो लक्ष्यते। अत तत्तद्शब्दव्युत्पादनमात्रे श्रुतेस्तात्पर्यम्, सर्वं सर्वत्र विवक्षितमेव इत्यभिप्रेत्य द्वितीयवाक्य एव, 'परमात्मनि सम्प्रतिष्ठाप्य' इति परमात्मघटन कृत भाष्ये। प्राणायामस्य च प्रत्याहारापेक्षया पूर्वाङ्गतया अष्टाङ्गयोगे परिगणनात् पूर्ववाक्ये करणप्रतिष्ठापने कथिते प्राणायामोऽपि कथितप्राय इति प्राणपद जीवपर स्वीकृतम्। अथवा ध्यानस्य विष्णुमात्रगोचरत्व विषयान्तर-भूतदेवमनुष्यादित करणाना प्रत्यहारे सत्येवेति पूर्ववाक्ये ताव-दुक्तम्। ध्यातु रुद्रतादात्म्यभावना च रुद्रवत् स्वात्मन परमात्मनि प्रतिष्ठापने कृत एव भवितुमर्हतीति द्वितीयवाक्ये यथाभाष्य तद् विवक्षितम्। मोक्षार्थध्येयेशानध्यानञ्च नादान्ते परमात्मनि प्रतिष्ठान एव, न पुन नादार्थपरिचये इति तृतीयवाक्ये दर्शितमिति प्रति नियतनिदर्शोपपत्तिर्विमृश्या। तृतीयवाक्यस्य वेदार्थसग्रहवर्णितोऽर्थ उपरि दर्शयिष्यते। एव, 'न कारणम्' इत्यस्य श्रुतप्रकाशिकोक्तोऽर्थोऽपि।

नन्वस्तु नाम विष्णोर्जन्म अवतारभूतम्। अथापि तस्य रुद्रादि वदुपास्यत्व न भवति, सर्वकारणस्य पुरुषस्य परवासुदेवस्यैवो पास्यत्वविधानादिति चेन्न–विष्णुपुराणे, 'नैसर्गिको न वै बोधस्तेषा-मप्यन्यतो यत इत्येव परत्वोपासनस्यैव मोक्षहेतुत्ववर्णनात्। विष्णोर्वासुदेवाभिन्नतयाऽनुपास्यत्वायोगाच्च। अत एव, ध्यान विष्णु इति परध्यानस्य विष्णुरूपत्वमत्रैवोक्तम्। 'विभवार्चनात् व्यूह प्राप्यव्यूहार्चनात् पर ब्रह्म वासुदेवाख्य प्रतिपद्यन्त' इतिवत् विष्णूपासन क्रमिकमुक्तिहेतुरपि स्यात्। तथा फलान्तरहेतुरपि;

१३. (३) प्राणं मनसि सह करणैः संप्रतिष्ठाप्य ध्याता रुद्रः । १४. (४) प्राणं मनसि सह करणैर्नादान्ते परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायितव्यम् । १५. सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते

तृतीयस्योत्तरमाह— प्राणं.........रुद्रः । मनसि प्रविलापितैरिन्द्रियैस्सह **प्राण**मपि जीवमपि, "यच्छेद्वाङ्मनसी प्राज्ञस्तद् यच्छेत् ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत् तद् यच्छेच्छान्त आत्मनि" इत्युक्तरीत्या परमात्मनि संप्रतिष्ठाप्य ध्याता पुमान् रुद्ररूपः । ध्याता रुद्रबुद्ध्या ध्यातव्य इत्यर्थः ।

कथ ध्येय इति चतुर्थस्योत्तरमाह--**प्राणं--प्रध्यायितव्यम्** । **नादान्ते** अर्धमात्रावसाने परमात्मनि जीवं **संप्रतिष्ठाप्य** तच्छेषतैकप्रवणं कृत्वा प्रकर्षेण ध्यातव्यमीशानं ध्यायीतेत्यर्थ. । एवञ्च **ईशान**-शब्दितो देवताविशेषो ध्यातव्य इत्युक्तं भवति । **प्रध्यायितव्यम्** इति आत्वाभावेडागमौ छान्दसौ । तस्यैव प्रकर्षेण ध्यातव्यत्वे युक्तिमाह **सर्वम्**— । **सर्वमिदं** चिदचिदात्मकप्रपञ्चभूतं प्रसिद्धाः ब्रह्मविष्णुरुद्रेन्द्राः भूतेन्द्रियैस्सहोत्पद्यन्ते । अत उत्पत्तिमत्त्वादेषां न प्रकर्षेण

परोपासनं पुनः साक्षान्मुक्तिहेतुरिति तत्र श्रुतेरादरः । किञ्च यथा परिच्छिन्नविभवः प्रतीयते विष्णुः, तथा तस्य मुक्तयेऽनुपास्यत्वमेव । परवासुदेवाभिन्नतया तादृप्येणोपासनं तु नासंमतम् । ब्रह्मरुद्रादीनामपि हि तादृप्येणोपासनमिष्टम् । परंतु तादृप्यमिदं प्रमाणबलात् तत्र शरीरात्मभावरूपम्, विष्णुविषये तु साक्षादभेद इति विशेषः । अत एव, 'विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम्' इत्यादिः विष्णुपदघटितैव परमर्षिपराशरसूक्तिरिति ।

[सर्वे] संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः । १६. न कारणं कारणानां धाता ध्याता । १७. कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शम्भुराकाशमध्ये[1] ।

ध्यातव्यत्वमित्यर्थः । ननु सर्वकारणत्वेन प्रसिद्धयोः ब्रह्मरुद्रयोः कुतो न ध्यातव्यत्वमित्यत्राह **न कारणं....॥ धाता** ब्रह्मा पूर्वत्र **'ध्याता** रुद्रः' इति ध्यातृत्वेनोक्तश्च रुद्र जगत्कारणो भूतोऽपि जगत्कारणकारणं न भवतीत्यर्थः । पुनः किं ध्येयमित्यत्राह **कारणं तु ..** । **कारणं** चेतनाचेतनात्मकप्रपञ्चकारणभूत **सर्वेश्वरः** सर्वनियन्ता **सर्वैश्वर्यसंपन्नः** सर्वेण=सर्वविधेन ऐश्वर्येण=शेषित्वेन, मातापितृनृपलोकपालादिनिष्ठेनापि शेषित्वेन, संपन्न , मातापित्रादिरूपेण च य स एव, शं भवत्यस्मादिति **शम्भुः** मोक्षप्रद इत्यर्थ । स एव हृदयाकाशमध्ये ध्यातव्य ; न त्वीशानशब्दवाच्य संहर्ता रुद्र इत्यर्थ । ["इति नारायण शम्भुः भगवान् जगता पति । संदिश्य विबुधान् सर्वान् अजायत यदो कुले ॥"] इति **शम्भुशब्दस्य** भगवत्परतायाः तदुत्पत्तेरवताररूपतायाश्चोपबृंहितत्वादत्रत्यशम्भुशब्दोऽपि भगवत्पर । ब्रह्मविष्णुरुद्रेन्द्रा इति श्रूयमाणाऽपि विष्णोरुत्पत्तिरवताररूपेति द्रष्टव्यम् ।] [2]'अजायमानो बहुधा विजायते', 'पिता पुत्रेण पितृमान् योनियोनौ' इत्यादिश्रुतिरप्यत्रानुसंधेया ।

---

1. आकाशमध्य इत्येतदनन्तरं पुनर्ध्येयपदं नास्तीति श्रुतप्रकाशिकाशैल्याऽप्यवगम्यते, कारणंत्वित्यारभ्य वाक्यैक्यात् ।

2. अजायमान इति वाक्यमिदं—, सर्वव्याप्त्यानाधिकरणश्रुतप्रकाशिकायामथर्वशिखानिर्दिष्टे एतद्वाक्योपादानस्थल इव अत्रापि, विष्णूत्पत्तेरवताररूपत्वस्थापनार्थमेव प्रवृत्तम् । अन्यथा असंगतेरिति।

१८. ध्रुवं स्तब्ध्वाऽधिकं क्षणमेकम्, क्रतुशतस्यापि चतुस्सप्तत्या यत् फलम्, तदाप्नोति कृत्स्नमोंकार[1]गतिश्च सर्वध्यानयोगज्ञानानां यत् फलम्।

१९. ओंकारो वेदपर ईशो वा। २०. शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य। २१. समाप्ताऽथर्वशिखेति।

एकं क्षणमधिकं वा, ध्रुवं=स्थिरं परमात्मानं स्तब्ध्वा नैश्चल्येन ध्यात्वा क्रतुशतचतुस्सप्ततिफलमाप्नोति कृत्स्नम् ओंकारगतिं ओंकारप्राप्यं फलञ्चाऽऽप्नोतीत्यर्थः। सर्वध्यानयोगज्ञानानां यत् फलम्, तत् फलं प्राप्नोतीत्यर्थः। उक्तं ध्यानकरणमोंकारं स्तौति ओंकारः- सर्वस्माद्वेदात् ओंकारः श्रेष्ठ इत्यर्थः। सर्वफलप्रदाने ईशः शक्तश्चेत्यर्थः। वाशब्दश्चार्थे॥

ध्येयमुपसंहरति-शिवः....परित्यज्य। अन्यत् सर्वं परित्यज्य।? इति नारायणः शम्भुर्भगवान् जगतां पतिः. विष्णोः पतिव्रतारूपेति द्रष्टव्यम। शिवंकरः शिवंकरः. मोक्षप्रदः शिव एव ध्येयः। अतत्यशिवंकरशब्दः प्रसिद्धशिवव्यावृत्त्यर्थः॥ वक्तव्यांश (शे?) किमपि नावशिष्टमिति स्वयमेव श्रुतिराह – समाप्ताऽथर्वशिखेति।

कोशेषु शिवंतुरवाक्यव्याख्यानानन्तरनिविष्टोऽपि "इति नारायणः शम्भुः" इत्यादिः 'द्रष्टव्यम्' इत्यन्तः कुण्डलितो ग्रन्थोऽत्रैव भाष्य इति अत्र मुद्रितः। शम्भुशब्दस्याप्यत्रैव सत्त्वात् उपरि तद्ग्रन्थानन्वयाच्च।

1. ओंकारगतमिति क्वचित् पाठः।

अत्रेदमथर्वशिखारहस्यम्–कश्च ध्येय इत्यस्य साक्षात् समानाकारमुत्तरम्—कारणं तु ध्येय इति। तच्छेषतया प्रवृत्ते, 'ध्यायीतेशानं प्रध्यायितव्यम्' इति वाक्ये इदमुच्यते—ईशानं ध्यायेत्। कीदृशमीशानम्? न रुद्राभिधमीशानम्, किंतु प्रध्यातव्यम्, प्रकर्षेण ध्येयतया विधिप्राप्तमीशानम्। प्रकृष्टध्यानं नाम मोक्षार्थध्यानम्।

प्रसिद्धेशानव्यावर्तनाय प्रध्यातव्यमिति प्रयुज्य, कुतः स रुद्र ईशानः प्रध्यातव्यो न भवतीत्याशङ्कां परिहर्तुं सर्वमिदमिति वाक्यं प्रवर्तितम्। सर्वस्यैव प्रपञ्चस्य, ब्रह्मरुद्रादेरपि कार्यत्वात्, "आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः। प्राणिनः कर्मजनितसंसारवशवर्तिनः॥ यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः", "अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः"। इत्युपबृंहितरीत्या न मुमुक्षुध्येयत्वमित्युक्तं भवति। ननु जगत्संहारकारणत्वेन प्रसिद्ध ईशानः कथं संप्रसूयते इत्यत्राह न कारणमित्यादि। अत्र धातुर्ब्रह्मण उपादानं रुद्रपितुर्ब्रह्मण एव कार्यत्वे अध्येयत्वे च सति किमुत रुद्रस्येति द्रष्टव्ये। एतेन ईशानशब्दस्य रूढत्वे रुद्र एव ध्येयः, यौगिकत्वे चतुर्मुखोऽपीति शङ्काऽपि शमिता, तयोः व्यष्टिगतयोः कारणभूतसमष्ट्यादिकारणत्वाभावात्। अतः कारणकारणत्वादिविशिष्टो यः शम्भुः स ध्येयः, न तु कार्यभूतोऽनीश्वरशम्भुरिति। आकाशमध्य इति वात्सल्यातिशयेन विशेषानुग्रहाय अजहत्स्वस्वभावतया हृदयकुहरेऽवतीर्णत्वं प्रदर्श्यते। तेन हार्दवितारवत् विष्णवाख्योऽवतारोऽपि कश्चिदिति नारनारूपसंप्रसनिरैश्वर्यध्यानिनीति गमितम्। तर्हि विष्णोरिव ब्रह्मरुद्रयोरपि प्रसूतिरवतार एवास्त्विति शङ्काशमनाय ब्रह्मविष्णुरुद्रेन्द्रा इति इन्द्रस्य सह वचनम्। तथासति इन्द्रादिजन्मापि अवतारः स्यादिति प्रतिबन्दिः। महेन्द्रस्य, सर्वमिदमित्युक्तप्रपञ्चस्येव कर्मवश्यत्वम्, अनुग्रहाय प्रवर्तनप्रतीक्षत्वमुपासनमहिमलब्धानेकाशास्त्रेष्वप्यादिकश्चेन्द्रप्राणाधिकारणसिद्धम्। तथाच जन्मसामान्यं कर्मकृतमित्युत्सर्गः। अकर्मवश्यतया, 'न चास्य कश्चिज्जनिता न चाधिपः' इति अकारणकतया, विशेषवचनबलाच्च विष्णुप्रसूतिरैश्वरावताररूपेति। तत् सिद्धं प्रसिद्धरुद्रव्यावर्तनेन अर्धमात्रादेवताभूतः पुरुषः परमात्मा श्रीमन्नारायण एव रुद्रतुल्येन ध्याता सर्वेश्वरशिवपितामहशिवंकरशम्भुरत्र ध्येयतया प्रतिपाद्यत इति॥

अत्र पाठभेदादेस्सुगमत्वाय आनन्दाश्रमशिष्यशङ्करानन्दकृत-प्रतिपद्व्याख्यातालकोशग्रन्थात् कतिपयांश उद्ध्रियते—अर्धमात्रा= अर्धं विन्दुः। तद्रूपा मात्रा। संवर्तकोऽग्निः संकर्षणमुखानलः। भास्वतीः स्मृताः। भास्वत्यो विचित्रवर्णाः प्रकाशादिकाः; स्मृताः चिन्तिताः। महत् महदाख्यम्। शुभाशुभा पुण्यपापरूपा, एतन्नाम्नी च। चतुष्पादः ऋग्वेदादिचतुष्पादः। चतुश्शिरः ब्रह्मविष्णुरुद्र-पुरुषरूपशिरस्कः। चतुश्शिरा एव चतुश्शिरः। चतुरर्धमात्रः। गार्हपत्याद्यग्नय एवार्धमात्रा इति। प्लुतप्रयोगेण—प्लुतार्हतत्वेन प्रणवस्य प्रयोगेण। प्राणानुद्दिश्य प्रलीयते—लयं याति; प्राणान् स्वस्मिन् लयं नयतीति वा। प्रणामयति—प्रकर्षेण प्रापयति। चतुर्धाऽ-वस्थितः पृथिव्यादिरूपैश्चतुष्प्रकारावस्थितः। इति=अस्मात् कारणात् सर्वदेवयोनिः। सर्ववाच्यवस्तु=सर्वनामरूपम् प्रणवात्मकम्= प्रणवस्वरूपम्। देवाश्चेति देवादयोऽपि प्रणवात्मका इत्यनेन प्रकारेण। संधत्ताम्=संधत्त-सम्यग् ध्यानं कुरुत। स्थानेभ्यः=स्थानशब्दाभि-धेयेभ्यः। ध्यायिभ्यः=ध्यानशीलेभ्यः (चतुर्थी) [अत्र 'सर्वेभ्योऽन्तः-शरीरे स्थानेभ्यः प्रकाशयतीति प्रकाशः प्रकाशः प्रकाशेभ्यः। सदो-मिति विद्युमद् द्योतयति मुहुर्मुहुरिति विद्युद्वत् प्रनीयात् इति पाठः। दिशं दिशमिति द्विः पाठो नास्ति। व्याप्नोति व्यापयतीति पाठः] जागर्ति जागर्ति जागरणं करोति। तेन सा जागरणम्। [अत्र मात्रे-त्यादेः कमप्यर्थमुन्मवर्ण्य, 'मात्राचतुष्टयान्नाधिकमित्यर्थः' इति भावो वर्णितः।] सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रात्मकम्। ते ब्रह्मादयः संप्रसूयन्ते स्वामिन्नं सर्वमिदमुत्पादयन्ति। [अत्रापि सर्वं इति पदं न] किमीश्वर-स्वरूपमिन्द्रियभूतमायाध्यात्तरूपम्, अन्यद्धेत्यत्राह सर्वाणि चेति। कारणमिति मायोच्यते। इन्द्रियादि न ध्येयमित्यर्थः। किंतु कारणमेव ध्येयम्। कारणमिह मायाया अप्याश्रयः [सर्वैश्वर्यश्चेति चकारसहित-पाठः] शम्भुः सुखकारणम्। आकाशमध्य इति उपर्यन्वेति।

आकाशमध्यं स्तम्भनां नीत्वेत्यर्थः । ओंकारो यत् फलं वेद जानाति, तदप्याप्नोति । पर ईशो वा = परः ईश एवेति ॥

—:*:—

वेदार्थसंग्रहे, 'प्राणं मनसि सह करणै ' इत्यादिवाक्यस्य अथर्वशिखागतस्यार्थ एवं सगृहीत — । अत॰ ' प्राणं मनसि सह करणै " इत्यादिवाक्यं सर्वकारणे परमात्मनि करणप्राणादि सर्वं विकारजातमुपसंहृत्य तमेव परमात्मान सर्वस्येशान ध्यायीतेति परब्रह्मभूतनारायणस्यैव ध्यान विदधाति । 'पतिं विश्वस्य' इति, 'न तस्येशे कश्चन' इति च तस्यैव सर्वस्येशानता प्रतिपादिता । अत एव, 'सर्वैश्वर्यसंपन्न सर्वेश्वरः शम्भुराकाशमध्ये ध्येय ' इति नारायणस्यैव परमकारणस्य शम्भुशब्दवाच्यस्य ध्यान विधीयते । 'कश्च ध्येय ' इत्यारभ्य, 'कारणं तु ध्येय ' इति कार्यस्याध्येयतापूर्वकारणैकध्येयतापरत्वाद् वाक्यस्य ।" इति ।

"उपसहृत्य = परमात्मनि विकारजातोपसंहारमनुसंधाय" इति वेदार्थसग्रहव्याख्या तात्पर्यदीपिका । तुरीये सर्वकरणोपसंहारत्वस्य प्राक् श्रुत्युक्तत्वात् तदनुगुणमिदम् ।

'न कारणम्' इत्यत्र पूर्ववाक्यात् 'सप्रसूयत' इति विपरिणम्यानुषङ्गेण, *जगत्कारण नोत्पाद्यत इत्यर्थ* उक्त *श्रुतप्रकाशिकायाम्* । तदनुरोधेन भावप्रकाशिकायाम् , 'धाता ध्याता' इत्यस्य जगत स्रष्टा तदर्थमादिसर्गसकल्पकर्तेत्यर्थो वर्णित । उपनिषद्भाष्योक्तार्थश्चाक्लिष्ट ।

शम्भुशब्दार्थश्च श्रीसहस्रनामभाष्ये एव भाषित – , "स्वसौन्दर्यसौशील्यादिगुणाविष्कारेण श सुखं भावयतीति शम्भु ' इति ।

२० एतामधीत्य द्विजो गर्भवासात् विमुक्त ; विमुच्यते , एता-
मधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यत इति[ओं सत्यमित्युपनिषत्]
इति द्वितीय (?) खण्ड । आ भद्र कर्णेभिरिति शान्ति ।
इत्यथर्वशिखोपनिषत् ॥

एताम । एतामुपनिषदमधीत्य पूर्वोऽपि जनो विमुक्तः ;
अद्याप्यधीयानो विमुच्यत इत्यर्थ । द्विरुक्तिरुपनिषत्समाप्त्यर्था ॥

क्षेमाय य करुणया क्षितिनिर्जराणा भूमावजृम्भयत भाष्यसुधामुदार ।
वामागमाध्वगवदावदतूलवातो रामानुज स मुनिरादियता मदुक्तिम् ॥

इति श्रीमत्तातायार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्य
पादसेवासमधिगतशारीरकमीमासाभाष्यहृदयस्य,
परकालमुनिपादसेवासमधिगतपारमहंस्यस्य
श्रीरङ्गरामानुजमुने कृतिषु
अथर्वशिखोपनिषत्प्रकाशिका सपूर्णा ।

विमुक्तपद कठोपनिषदि, 'विमुक्तश्च विमुच्यते' इत्यत्रेव रागद्वेषादिविमुक्तिपरम् गर्भवासादिति श्रवणात् । अत एव व्याख्यातम् । एतद्विद्यया पुनर्जन्मरहित एव सन् अस्मिन्नेव जन्मनि मुक्तो भवतीत्यर्थस्तु काम गृह्यताम् । वस्तुतस्तदा विमुक्त इति पुनरुक्तमेव ।

इत्यथर्वशिखाभाष्यपरिष्कारो व्यतन्यत ।
ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ॥

इति श्रीवेदान्तरामानुजयतीन्द्रपदाब्जमधुव्रतस्य श्रीरङ्गरामानुजमुनि
चरणाम्बुजसेवासपादितसर्ववेदान्तार्थस्य वात्स्यसचक्रवर्तिनो
वीरराघवाचार्यस्य कृतिषु
अथर्वशिखाभाष्यपरिष्कारः
श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नम ।
शुभमस्तु

अथर्वशिखासारसंग्रहकारिकाः ।

अङ्गिर प्रभृतिप्रश्ने प्राहाथर्वा चतुष्टयम् ।
ध्यानस्य कारण ध्यान ध्याता ध्येय इति क्रमात् ॥
ओंकार करण ब्रह्म चतुष्पाच्चतुरक्षरम् ।
प्रत्यक्षर लोकवेददेवच्छन्दोग्निभावना ॥
ब्रह्मा विष्णू रुद्र एवं पुरुषो देवता क्रमात् ।
ह्रस्वदीर्घप्लुतात्मा स प्लुतरूप प्रयुज्यताम् ॥
नाना नामानि चान्वर्थान्येतस्येत्युक्तमादिमम् ।
अथ द्वीण्यक्ष च ध्यान योगे विष्णुतया स्थितम् ॥
ध्याता रुद्रतया भाव्यो ध्येयस्तु श्रुवता पर ।
भूतेन्द्रियादिवद् ब्रह्मरुद्राद्यपि हि सूयते ॥
अन्यो यो मोक्षमुखद समष्टेरपि कारणम् ।
स ध्येय ईश्वरो नान्य इत्यथर्वशिखाश्रुति ॥

पुरुषनामानि— पैप्पलाद अङ्गिरा सनत्कुमार अथर्वा.

विषयाः

अथर्वणा मन्त्र-ध्यान ध्यातृ-ध्येय प्रकारनिरूपणम्	454-455
ओंकारनिरूपणप्रपञ्च	455-456
अक्षरभेदेन देवतादिकथनम्	456-457
नानाप्रणवनामनिर्वचनम्	459
ध्यानस्य विष्णुरूपत्वम् 461-462 ध्यातरि रुद्रभावना	464
सर्वकारणभूतस्य परवस्तुनो मोक्षार्थध्येयत्वम्	465

॥ शुभमस्तु ॥

श्रीः

उपनिषत्परिष्कारान्तर्गतः

अथर्वशिरस्सारः

अखिलमनुवदिष्यन्नर्थमार्यैस्तु पूर्वैः
अभिहितमिह किञ्चिद्वाक्यमात्रार्थमात्रम् ।
उपनिषदि विवक्षाम्यक्षमा मर्ववाक्य-
स्फुटगतिविरहेपि स्यात् परिष्कारभाक् धीः ॥

अथर्वशिरसि पदवाक्यानुपूर्व्यामभ्यधिकाः विपर्यासा व्यक्त लक्ष्यन्ते । उत्तरदेशीयदेवनागरीमुद्रणेषु महीशूरपुरान्ध्रलिपिमुद्रणे च महद् वैषम्यम् । पूर्वत्र मुद्रणे अथर्वशिरसि अथर्वशिखोक्तप्रणवमात्राभेद तद्देवतावर्णादेरीषद्विशदं वर्णनमपि लक्ष्यते । उत्तरत्र न तत्प्रस्तावः । पूर्वत्र ओङ्कारनाम्ना बहूना परिगणने रुद्रेशानभगवन्महेश्वरनाम्ना निर्देश ; उत्तरत्र महादेवनामापि ओङ्कारनामतया अन्ते समगणि, निरवाचि च । स्थूलमिदं प्रदर्शनम् , आदित आ अवसानात सन्ति असंख्या भेदा । तत्र अत्रोपात्ता· पूर्वाचार्यग्रन्था प्रायो महीशूरमुद्रणदृष्टामानुपूर्वीमेवानुरुन्धत इति तत्रतत्रोद्धृतवाक्यांशनिरीक्षणाध्यिधीयते । श्रीवेंकटेशभाष्यविद्याविमर्शालयकोश प्रायो महीशूरमुद्रितसमान एव । अतो बहुविवादग्रस्तानुपूर्व्यतया, आनुपूर्व्या किञ्चिद्व्याख्यानस्यासदीयादतस्य अलाभेन च अथर्वशिरोमूलमुद्रण नात्र क्रियते । अथापि पूर्वाचार्यैस्तदर्थस्य निष्कृष्टत्वात् तदनुवादमत्र कर्तुं प्रवृत्त तच्छेपतया तदुपक्रमभाग. किञ्चिद्विशदं प्रकाश्य तत्तत्खण्डगतकतिपयवाक्यशकलमात्रमर्थवैशद्यायात्र निवेश्यते । अत्रैवमथर्वशिरस उपक्रमः—

हरिः ओं। देवा ह वै स्वर्गं लोकमायन्। ते रुद्रमपृच्छन् को भवानिति॥ सोऽब्रवीत्, अहमेकः प्रथममासं वर्तामि च भविष्यामि च; नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविशत्। दिशश्चान्तरं प्राविशत्। सोऽहं नित्यानित्योऽहं व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्चोदञ्चोऽहम् अधश्चोर्ध्वश्चाहं दिशश्च प्रदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं गायत्र्यहं सावित्र्यहं त्रिष्टुब्जगत्यनुष्टुप्चाहं छन्दोऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं गौर्यहम् ऋगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहम्

यो मा वेद स सर्वान् देवान् वेद सर्वांश्च वेदान् साङ्गानपि सह ब्राह्मणैश्च गा गोभि धर्मेण धर्मं तर्पयामि स्वेन तेजसा।

ततो ह वै ते देवा रुद्रमपृच्छन्। ते देवा रुद्रमपश्यन्। ते देवा रुद्रमध्यायन्। ततो देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति इति।

ननु देवैः, 'क परम्' इति वा, साक्षादेव 'क परमात्मा' इति वा प्रष्टव्ये, को भवानिति प्रश्नः कुत इति चेत्— अत्रोक्तं श्रुतप्रकाशिकायाम्— 'देवतान्तरसाधारण्येऽपि प्रभावातिशयदर्शनेन संदेहाद् देवा अपृच्छन्' इति। अयं भावः —तत्त्वनिर्दिधारयिषुभिरिन्द्रादिभिः कदाचित् वैष्णवतेजोविशेषाद् विलक्षणमसाधारणादिरूपं रुद्रेऽपि दृष्टवद्भिः, 'अस्य साक्षात्त्वादनेनापि हि विष्णुकिङ्करेण भाव्यम्। तत् कथमस्यैव तेजः?' इति आश्चर्यवद्भिः, तथापि प्रभावातिशयदर्शनेन किमयं स्वतन्त्र इति सन्दिहानैः पृष्टम् 'को भवान्' इति। स चाऽऽत्मान्तरात्मानं हृदि निधायोवाच, अहमेक इत्यादिना। तथा च— अहमपि वैष्णव एव। जानाम्येव सर्वान्तरं परमात्मानम्। ममाऽनुप्रवेशनमात्र तदुपासनाविशेष, यत्र मे वेदादिकमित्यवदिति बोधितं भवति। तदस्मै तद् विज्ञाय तं तुष्टुवुः। तदेतत् तदीयमुपासनमथर्वशिरसि प्रतिपादित

इति । अयमर्थोऽस्माभिर्वेदान्तपुष्पाञ्जलौ प्रदर्शित इत्थम्—
"रुद्रो मत्प्रावृताङ्गो विगतदृक् अनिमिषैर्विस्मितैः को भवानि-
त्युक्तः स्वं माधुवृत्तं गमयितुमगदत् नित्यसर्वात्मतां स्वाम् ।
स त्वत्तः स्वान्तरं त्वामपि बहिरखिलात् वीक्ष्य लक्ष्मीश ! सोऽहं
सर्वोऽप्यन्योन्यमिश्रोऽहमिति दृढमतिस्तैश्च वेद्यं स्वमाह ॥" इति।

श्रुत्यर्थः—देवानां प्रश्नाशयं विज्ञाय रुद्रः एवं प्रत्युवाच अहमेक इत्यादि। कालत्रयवृत्तिरेकोऽहमित्यर्थः। प्र. प्रलयेऽपि विना विलयं वर्तमान एक. प्रसिद्धः परमात्मा सोऽहम् ; स मदन्तर्यामी; तच्छेष एवाहमिति यावत्। मत्तः —मदन्तर्यामिभूतात् परमात्मनो व्यतिरिक्त –पृथग्भूत: नान्यः कश्चित्। यो यो भिन्न इह लक्ष्यते, तस्य सर्वस्य हि स आत्मेति वास्त.ार्थः ।

'जीवान्तरवत् परमात्मनोऽन्यो रुद्रः कथमेवं स्वात्मानं परमात्मत्वेनाऽऽह ? किं पौण्ड्रकादिवत् अभिमानेन' इति शंकायां श्रुतिस्तत्त्वमसम्यगुपदेष्टुम्, इतीति तद्वाक्यं निगमय्य स्वयमाह सोऽन्तरादिति। सः रुद्रो जीवः अन्तरात् देहाद्यपेक्षया सूक्ष्माज्जीवात् अन्तरं सूक्ष्मं परमात्मानं प्राविशत्। तद्विषयकान्तरात्मत्वधीसंपन्न आसीदिति यावत्। दिशश्चान्तरं प्राविशत्। सर्वाचेतनान्तर्यामित्वान्तर्यामित्वैव ज्ञानवांश्चासीदिति।

एवमसम्यगुपदिश्य पुनस्तदीयवाक्यान्यपि श्रुतिरनुवदति सोऽहमित्यादिना। मदन्तर्यामी स एव नित्यानित्यादिसर्वान्तर्यामीति सर्ववाक्यार्थः। एवमेव हि प्रह्लाद-वामदेवादिभिरनुसंहितमिति "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति ब्रह्मसूत्रे प्रत्यपादि। एवम्भूतविवेकशालिना

स्वेन ब्रह्मादिजङ्गमस्थावरचेतनाचेतनमर्वा-न्तर्यामी स तत्तद्‌र्हवृत्त्यनुष्ठाप नेन स्वधर्मेण तर्प्यते चेति स्वस्य धर्मान्यस्याभङ्गकरया नाऽमप्याह ब्रह्म ब्रा ह्मणैरित्यादिना। ब्रह्मादिद्वितीयान्तपदानि तत्तदर्थान्तर्यामिणमित्यर्थकानि। ब्राह्मणादितृतीयान्तपदानि तत्तदर्हधर्मपराणि। तत्तद्वस्तु यथावत उपयोज्य कर्तुं शक्य तदाराधनं सर्वं कुर्वन्नस्मीत्यर्थः । ततो ह वै इति । रुद्रस्य भगवति भगवद्धर्मे च निष्ठाऽस्ति न वेति जिज्ञासितत्वादेव को भगानित्यपृच्छन् । यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमोनम । यो वै रुद्रः स भगवान् यश्च स्कन्दस्तस्मै वै नमोनम । यो वै यश्चेन्द्र यश्चाग्नि इत्यादि । रुद्रस्य भगवत्त्वात् ब्रह्मस्कन्देन्द्रादित्वमप्यस्ति । रुद्रशब्दस्य ब्रह्मस्कन्दादिशब्दानाञ्च भगवदभेदान्वयार्हतया तदन्तर्याम्यर्थकत्वात्. अभेदान्वयोपपत्ति भगवत्पर्यन्तभावनया नमस्कार्यत्वोपपत्तिश्चेति भाव ।

अथायमैवयवाद शरीरात्मभावनिबन्धन इति प्रदर्श्य सर्वस्य तद्विभूतित्वमाहुर्देवा , ' भूस्ते आदि , मध्यं भुव , स्वस्ते शीर्षम् । विश्वरूपोऽसि ब्रह्मैकस्त्व द्विधस्त्व शान्तिस्त्वम् "इत्येवम् ।

अथ तस्योपसहर्तृत्व मस्तुत्य ओंकारस्य प्रणवादीनि बहूनि नाम धेयानि निर्दिश्य तेषामर्थवर्णनञ्च पश्चात् , अथ कस्मादुच्यते ओंकार इति, कस्मादुच्यते प्रणव इत्येवम् । अथ तस्यैव ससाररुद्रावकत्वमुच्यते, "एको रुद्रो न द्वितीयाय तस्थे" इति । तच्चोपासनादिति, "तमीशान पुरुष देवमीड्य निचाय्येमा शान्तिमत्य तमेति" इति मन्त्रेणोक्तम् । अथास्य प्रणवमात्राणा ब्रह्मविष्णुरुद्रदेवताकत्वमुपवर्ण्य फलभेदश्च श्रावित । "या सा प्रथमा मात्रा ब्रह्मदेवत्या यस्ता ध्यायते नित्य स गच्छेत् ब्रह्मपदम् । या सा द्वितीया मात्रा विष्णुदेवत्या गच्छेत् वैष्णव

पदम्। या सा तृतीया मात्रा ईशानदेवत्या गच्छेदैशानं पदम्।" इत्येवम् । अथ, या सा अर्धचतुर्थी मात्रेत्यारभ्य, 'यस्तां ध्यायते नित्यं स गच्छेत् पदमनामयम्' इति मोक्षफलमुक्तम् । तत् किमिति न विवृतम्। अनेन पूर्वोक्तानां त्रिमूर्तिपदानां सामयत्वमवगम्यते। "अथ पन्था विहित उत्तरेण येन देवायान्ति परमपरं परायणञ्च" इति तस्य देवयानमार्गगम्यत्वमुक्तम् । स च पन्था अर्चिरादिरेव । तेन अर्धचतुर्थमात्रोपास्यं वस्तु अर्चिरादिमार्गगम्यं ब्रह्मैवेत्यवधृतम् ।

ततः पशुपाशविमोक्षणाय पाशुपतं व्रतं चोदयता, 'अग्निरिति भस्म' इत्यारभ्य 'भस्मना अङ्गानि संस्पृशेत्' इति अङ्गेषु भस्मधारणं विहितम् । इदञ्च प्रकरणात् अथर्वशिर-उपदिष्टमोक्षार्थरुद्रशरीरकपरमात्मोपासनरूपभक्तियोगाङ्गमिति सुस्पष्टम् । तेन ऊर्ध्वपुण्ड्रधारणपूर्वकभक्तियोगवत् ईदृशभक्तियोगो मोक्षसाधनमिति निश्चीयते । रुद्रशरीरकतया परमात्मोपासनं कार्यमिति प्रक्रमवाक्यात् विशदमेव विज्ञायत इति न तत्र विवादः । अतः इदं मोक्षस्थानं रुद्रस्थानं न भवितुमर्हति। तदिदमन्तर्यामि पुनरपि विशेषतो वर्ण्यते, "योऽसौ रुद्रो योऽप्सु" इत्यादिभिर्मन्त्रैः । तत उपनिषदुपसंहारः । एवमथर्वशिरोर्थसंग्रहः ॥

एतदथर्वशिरोर्थसंग्रहश्च वेदार्थसंग्रहे—, "यत् पुनरथर्वशिरसि रुद्रेण स्वसर्वैश्वर्यं प्रपञ्चितम्, तत् 'सोऽन्तरादन्तरं प्राविशत्' इति परमात्मप्रवेशादुक्तमिति श्रुत्यैव व्यक्तम्" इति । व्याख्यातमिदमित्थं **तात्पर्यदीपिकायाम्** — रुद्रेण को भवानिति पृष्टेन प्रथमम्, अहमेकः प्रथममास वर्तामीत्यादिना स्वस्य सर्वात्मकत्वे उक्ते, 'परमात्मनो हि

सर्वात्मकत्वम्, कथं तद् भवत" इत्यपेक्षायाम्, इत्थमिति प्रकारार्थोऽयम् **इतिशब्दः**। सोऽन्तरादन्तरमिति वक्ष्यमाणप्रकारेणेत्यर्थः। यद्वाऽत्र इतिर्हेतौ। 'सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं स प्राविशत्' इति परमात्मानुप्रवेशात् सर्वात्मकत्वमित्यर्थः। इतिशब्दस्य हेतुपरत्वमभिप्रेत्य परमात्मप्रवेशादित्युक्तम्। यद्यपि इतिशब्दस्य समाप्तिरेवार्थः, अथापि रुद्रवाक्यावसानेऽन्वयकल्पनं न्याय्यम्, न त्वप्रयुक्तपदान्तराध्याहारः इति रुद्रवाक्यमेवेदम्। स इति परमात्मोच्यते, बुद्धिस्थत्वात्

स अन्तरादन्तरं शरीरादन्तरस्थं प्राणादेरप्यन्तरं जीवं प्राविशत्। **दिशश्चान्तरम्**। दिक्छब्देन समस्तजगद्वर्तिवस्तुजातं लक्ष्यते। सर्वपदार्थानामन्तरं जीवात्मवर्गं प्राविशत्। सर्वसामानाधिकरण्यस्य वक्ष्यमाणत्वात् तदुपपत्तये स्वस्य सर्वजीवानाञ्च परमात्मानुप्रवेश उक्तः। एवं रुद्रवाक्यत्वमेव युक्तम्॥ यद्वा श्रुतिवाक्यमस्तु। तदाऽयमर्थः — **सः रुद्रः अन्तरादन्तरं** जीवादन्तरं परमात्मानं **प्राविशत्** बुद्ध्या अगाहत। अनुप्रवेशशब्दस्य सम्यग्बोधनार्थत्वं लोकसिद्धम्। तथा चाणक्यप्रयोगश्च—"यस्ययस्य हि यो भावस्तेनतेन हि तं नरम्। अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्" इति। सः रुद्रः स्वान्तर्यामिणं परमात्मानं तच्छरीरकं बुद्ध्याऽनुसहितवानित्यर्थः। एवं निर्वाहद्वयमभिप्रेत्य **परमात्मप्रवेशादित्युक्तम्**। परमात्मनः प्रवेशादिति षष्ठीसमासः। परमात्मकर्तृकप्रवेशात् परमात्मकर्मकप्रवेशाच्चेति भावः" इति। अत्र इतिशब्दस्य हेतुपरत्वे **परमात्मप्रवेशादित्युत्तरवाक्येऽन्वय इव पूर्व-**

वाक्यान्वयोऽपि दर्शित सर्वत्र्याख्यानाधिकरणश्रुतप्रकाशिकायाम्-, मद्व्यतिरिक्ताभावात् अहमेव प्रथममासं वर्तामि च भविष्यामि चेति।

अथोपरितनखण्डार्थसंग्रहोऽपि (श्रुतप्र), "द्वितीयखण्डो रुद्रवाक्यानुवादेन स्तुतिपरत्वात् तदन्तर्यामिपरमात्मविषय। **यो वै रुद्रः स भगवानिति**। यो रुद्रान्तर्यामी स वासुदेव इत्यर्थ। भगवच्छब्दस्य वासुदेवासाधारणत्वात्। तच्च दर्शितम्। यो वै रुद्र स भगवान् यश्च विष्णुरिति अन्तर्यामिण एवावताररूपविशिष्टत्वमुक्तम्। तृतीये तु परमात्मनो वैभवम्। तद्वाचकस्य ओंकारस्य नामधेयानि चतुर्थे। तन्निर्वचनं पञ्चमे। षष्ठे तु, *'तदेतदुपासित यम्,' 'निचाय्य त शान्तिमत्यन्तमेति' इति रुद्रशरीरकपरमात्मोपासन साङ्गमुक्तम्। **व्रतमेतत् पाशुपतमिति**। पशुपतिरूपपरमात्मोपासनाङ्गतय पशुपतिसम्बद्ध पाशुपतम्, न तु पाशुपतागमप्रतिपाद्यम्, तद्विन्द्वयकल्पकाभावात्। भस्मस्नभसितस्पर्शन तु प्रकरणगृहीतत्वान्न सन्त प्राप्नोति दर्शपूर्णमासप्रकरणगृहीतप्रयाजवत्, सौत्रामणीप्रकरणगृहीतसुराग्रहवच्च। तस्मादथर्वशिरसि रुद्रान्तरात्मा नारायण एव प्रतिपाद्य, यथा प्रतर्दनविद्यायामिन्द्रान्तर्यामी।" इति।

सर्वमिद तदाचार्यपादैः श्रीवात्स्यवरदगुरुभिरेव निवेचित तत्त्वसारे, "यद् देवैरनुयुक्त उत्तरमुशन् रुद्रो विवृत्यात्मनि
व्याजह्रे महतीमधीश्वरधुरामाथर्वणे मूर्धनि।
स प्रादुर्भवदन्तरात्मभगवद्भूमाऽफणत 'सोऽन्तरात्
अन्त प्राविशत्' इत्यधीतविधया तद् वामदेवादिवत् ॥८०॥

*एव श्रुतिवाक्यपाठो महीशूरमुद्रणे द्रष्टव्यः।

'नान्य कश्चिन्मत्त' इत्युपन्यासवशादूर्ध्वं नेतिस्तत्समाप्तिं ब्रवीति[1] ।
प्रागत् पश्चादुपन्यासवशानुवृत्ते 'सोऽहं नित्योऽनित्य' इत्यादिभङ्ग्या ॥
सोऽसौ हेतु [2]र्वक्ति, नेति प्रकार प्रह्लादोक्तो हेतुरन्त प्रवेश ।
प्रह्लादोक्ति 'सर्वगत्वादनन्तस्ये' ति व्यक्ता वैष्णवाख्ये पुराणे ॥८२॥
[3]अथवेतिपदेन हेतुरत्र व्यतिरेकोऽकथि नान्य इत्यधीत ।
अहमेक इतीरितान्वयस्य [4]प्रतिपत्तु सुकर प्रकारपक्ष ॥ ८३ ॥
रुद्रस्योक्ति 'सोऽन्तरा'दित्यतोऽसौ तस्मादन्य कोऽपि तस्यान्तरात्मा ।
अन्येषाञ्चेत्युच्यते 'सोन्तरा'दित्युक्त्या रौद्रया सोऽपि विष्णु प्रसिद्ध ॥
[5]इत्युक्तिर्वा समाप्तिं वदतु हरगिर 'सोऽन्तरा'दित्यतोऽसौ
मा भूद् रुद्रोक्तिरित्यसति न विघटना किञ्चिदस्मन्मतस्य ।
रुद्र स्वात्माऽऽत्मभूत हरिममलधिया स प्रविष्टश्चिकीर्षु
मेधावीव स्वकस्य परमपरमिति व्यज्यते वेदवाचा ॥ ८५ ॥

श्लोकानामर्थं दर्शितन्तात्पर्यदीपिकायां अवधान वहता सुगम ।
'नान्य कश्चिन्मत्तो व्यतिरिक्त इति' इति 'नान्य' इति वाक्योपरि श्रूयमाण इति न समाप्त्यर्थं, तावति रुद्रस्य वचनसमाप्त्यभावात्। 2 तन इति अन्त प्रवेश हेतुतया वक्ति । . इतिशब्द पूर्ववाक्यार्थस्यैव हेतुत्वपरोऽपि सुवच इत्याह अथवेति । अहमेक इत्युक्तस्यान्वयस्य यो व्यतिरेक नान्य इति स हेतुरित्यर्थ ।
4 अथ इतिशब्दस्य प्रकारार्थकत्वमपि स्वीकर्तुं शक्यमिति ।
5 अस्तु वा इतिशब्द समाप्त्यर्थक इत्यर्थ । समाप्त्यर्थकत्वेऽस्य सर्वरुद्रवाक्यान्तर्यो योजनेति कश्चित् पक्षोऽस्ति । तमप्यङ्गीकृत्य, एतदुत्तरवाक्यस्य रुद्रवाक्यत्वाभावादेतावत इतिशब्द इति स्वीकारेऽपि न दोष इत्यर्थ । मेधावीवेति । उक्त चाणक्यवाक्यमिह विवक्षितम् ।

अथ द्वितीयतृतीयचतुर्थपञ्चमखण्डविषयश्लोकाः । तदन्ते—

उदितमुपासनद्वयमथर्वशिरश्शिखयोः स्फुटमपुनर्भवाय पुरवैरिकलेवरिणः । कमलदृशः [1]क्वचित् क्वचन कारणतत्त्वपरश्रुतिविहितस्य हार्दसुषिमध्यजुषो विदुषः ॥ ९२ ॥

ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ।
इत्यथर्वशिरस्सारः प्राच्योक्तिकलनात् कृतः ॥

श्रीमते भगवद्रामानुजाय नमः । श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ।

1. क्वचित् क्वचनेत्यस्य तत्रतत्र श्रुत्यन्तरेष्वित्यर्थं वर्णयन्ति । एवञ्च अत्र विदुषा स्वहृदयसुषिवर्तिपुण्डरीकाक्षमूर्त्यनुसंधानमेव कार्यम्; तत्रेह रुद्रान्तर्यामित्वमपि परमात्मन्यनुसंधेयमिति भावो वक्तव्यः । वस्तुतस्तु प्रतर्दनविद्यायामिन्द्रेणेव अथर्वशिरसि रुद्रेण शास्त्रदृष्ट्या व्यवहारात्, देवैश्च तथैव स्तवनात्, (ओंकारे ईशानमहेश्वरमहादेवनामघटनात्) रुद्रासाधारणमसाधारणस्य विद्याङ्गत्वश्रवणाच्च रुद्रान्तर्यामित्वमप्युपास्याकारोऽस्तु । अथाप्यथर्वशिखायां तत् कुतः? । तथाच क्वचिदिति अथर्वशिरसीत्यर्थकं पूर्वत्रान्वेति । क्वचनेति अथर्वशिखायामित्यर्थकमुत्तरत्रान्वेति । तथाच शिखायां न रुद्रान्तर्यामित्वमुपास्याकारः । 'अत एव उपासनद्वयम्' इति भेदः प्रदर्शितः । तात्पर्यचन्द्रिकायामपि (८.१३.) अथर्वशिरःप्रस्तावमात्रे, 'अत्र प्रकरणादिवशात् प्रतर्दनविद्यावत् अन्तरितं शासनमनुसंधेयम्' इत्युक्तम् । कारणतत्त्वपरश्रुतिविहितस्येत्यनेन शिखायां 'कारणं तु ध्येयः' इत्यत्र न कारणत्वविधिः; किंतु श्रुत्यन्तरतः कारणत्वेन प्रसिद्धस्य ध्यानविधिरिति वेदार्थसंग्रहाद्युक्तमनूदितम् ।

इति वात्स्यवीरराघवाचार्यकृतिषु अथर्वशिरस्सारः ॥

श्रीरस्तु. शुभमस्तु.